श्री:

श्री:

# प्राक्कथनम्   Introduction

## शोधनिबन्धनिर्माणे प्रवृत्ति:

उदयपुरस्थ राजकीय संस्कृतमहाविद्यालयस्य सेवातो विश्रामं प्राप्त: कस्यचिदर्थागमकरस्योद्योगस्याऽन्वेषणविचारे मग्नोऽहं समाचारपत्रेषु एकां भारत-सर्वकारीय शिक्षामन्त्रालयसंस्कृतविभागस्य विज्ञप्तिमेकां दृग्विषयमकरवम् । यस्यां संस्कृतविद्वद्भ्य: शोधनिबन्धलेखने मुद्राशतद्वयीं प्रतिमासं दातुं स्वीकृत्य-शोधकार्यं चिकीर्षव: स्वकीयावेदनपत्राणि प्रेषयितुं प्रेरिता आसन् ।

उदयपुरस्थ-संस्कृत महाविद्यालये साहित्याचार्यकक्षास्थच्छात्रानध्यापतो मम अध्यापने अनुशीलने चाऽसकृदागतस्य "भारतचम्पू" काव्यस्योपरि किंचिल्लेखनस्य बहो: कालाद् विचार आसीत् । भारत सर्वकारस्य उपर्युक्तां विज्ञप्तिं दृष्ट्वा "भारतचम्पू" काव्यमादायैव शोधनिबन्धलेखनस्य विचारो मम-दृढतामयासीत् ।

साहित्यविषयक शोधनिबन्धलेखनकार्यावेक्षणस्य भारतसर्वकारेण-बडोदरा-संकृतमहाविद्यालयाधीने नियमितत्वात् "भारतचम्पू" काव्यसमीक्षाया रूपरेखया सह वत्सरद्वयावधिक-नियतवृत्ति प्राप्त्यर्थंकाऽऽवेदनपत्रं वटोदरासंस्कृत-महाविद्यालयस्य प्रधानाध्यापक महोदय द्वारा भारतसर्वकारीय शिक्षामन्त्रालयं प्राहिणवम्, + यत् मदीय साक्षात्कारानन्तरं स्वीकृतं सर्वकारेण । तदनुसारं वर्षद्वयं यावत् प्रतिमासं मुद्राशतद्वयीं प्राप्नुवन् न्यबध्नाम् "भारतचम्पूकाव्यस्य साहित्य दृष्ट्या समीक्षणम्" इति नामकं शोधनिबन्धम् । योऽसौ विदुषां सम्मुखे वर्तते ।

## आभार प्रदर्शनम्

महर्घतापिशाच्या विकटविजृम्भणात्रा समयेऽस्मिन् समये संस्कृतविदुषां साहाय्याय स्वीकृता सेयं शोधनिबन्धलेखनोपरिवृत्तिदानयोजना न केवलं संस्कृतविदुषामेवोपकाराय संवृत्तास्ति ,अपितु सुरसरस्वत्याः भारतीयसंस्कृतयाश्चापि संरक्षणाय संवृत्तास्ति । अतस्तन्नियामकानां सर्वकारीयाधिकारिणां भृशमुपकारभारं बिभर्मि ।

बडोदरासंस्कृतमहाविद्यालयस्याध्यक्षाणां श्रीहरिप्रसाद जी०महेता महोदयानां महानुपकारभारोऽपि मयात्र स्मरणीय एव। ये प्रस्तुतशोधनिबन्धलेखनवृत्तिप्राप्त्यर्थकाऽऽवेदनपत्रं यथासमयं भारतसर्वकारीयशिक्षामन्त्रालयस्य संस्कृतविभागं प्रापय्य मम वृत्तिप्राप्तये महान्तं श्रमं स्वीकृतवन्तः ,अन्यथा मम वृत्तिलाभः, तन्मूलकः प्रस्तुतनिबन्धनिर्माणोद्यमश्चदुर्घट एवाऽभवत्। श्रीमहेतामहोदयाः मम वार्धक्यवैवश्यं विचिन्त्य शोधग्रन्थलेखनकाले स्वसमीपे वटोदरनिवासस्य प्रतिबन्धं दूरीकृत्य स्वगृहे कांकरोल्यां निवसत एव मम शोधनिबन्धलेखने स्वायत्तत्वं स्वीकृतवन्तः, वटोदरस्था एव च ते प्रारम्भादन्तावधि निबन्धलेखन-विषयकान् बहुमूल्यान् स्वकीयान् परामर्शान् निर्देशांश्च प्रेषितवन्तः। निबन्धेऽस्मिन् " चम्पूकाव्यानामुपलब्धिः ,चम्पूभारते-सुभाषितानि, चम्पूभारतीयच्छन्दः-संख्यासूची" ,अनन्तभट्टाकालिकयः परिस्थितयः, आलोचकानां दृष्टौ चम्पूभारतम् , चम्पूभारतस्य व्याख्याग्रन्थाः ,इति शीर्षका लेखा निबन्धेऽस्मिन् -श्रीमहेतामहोदयानां परामर्शानुसारमेव विलिख्य विनिवेशिताःसन्ति। एवं श्रीमहेतामहोदयाः शोधनिबन्धममुमाधारीकृत्य बटोदरस्थ-श्रीसयाजीरावमहाराज विश्वविद्यालयात् " वाचस्पति " नामकमुपाधिमपि मह्यं दापयितुं भूरिभूरि श्रमपुरस्कृतवन्तः सन्ति। इत्थमियमुपकार-परम्परा श्रीमहेतामहोदयानां मम सदैव स्मरणीयैव स्थास्यति। अत एव नूतन वर्षाभिनन्दनावसरे श्रीमहेतामहोदयानां शुभकामनायां लिखितमस्ति पद्यमेकंमयायत् -

" गीर्वाणिगीःसततसेवनदत्तचित्ते, तत्सेवकद्विजगणावनकार्यदक्षे ।
विद्याविनोदरसिके तु हरिप्रसादे,प्रोज्जृम्भतां सततमेव हरिप्रसादः ।। इति

वटोदरात् प्रेषितस्य मदीयवृत्त्यर्थकावेदनपत्रस्य भारतसर्वकारीयशि-

क्षामन्त्रालयाधिकारिभि: स्वीकृतौ कृतायां सत्यां तत्सम्बन्धीनि पूरणीयानि प्रपत्रकाणि तत्रत्यलेखक-प्रमादात् वटादरमप्राप्यतिस्मृतिं प्रापु: ,तेन-तत्पत्राणां मत्कृतपूर्तौ महान् कालातिपातो जात: ,तथापि संस्कृताधिकारिणो डाक्टर श्रीरामकरणशर्ममहोदया: मदर्थं वृत्तदानं स्वीकृत्यौदार्यं दर्शितवन्त:। दिल्लीस्थश्रीलालबहादुरशास्त्रिराष्ट्रिय संस्कृतविद्यापीठनिदेशका डाक्टरश्रीमण्डनमिश्रमहोदयाश्चप्रस्तुतविषये वधानदानायोक्तडाक्टर-महोदयान् दूरभाषद्वारा प्रार्थितवन्त: ,विषयस्यास्य तत्रान्वेषणायोपस्थापनाय च स्व-निकटे उक्तविद्यापीठस्थमस्मच्छिष्यडाक्टरश्रीबदरीनारायण शर्मपंचोलिमहोदयं च प्रेषितवन्त: ,यो ऽसौ महाभागा: परमया तत्परतया विषयममुमन्विष्य डाक्टर श्रीशर्ममहोदय सम्मुखे समुपस्थापयितुंशक्तो ऽभवत्,येनममवृत्तिलाभे श्रीमहेतामहोदयकृतानां प्रयासानां साफल्यमजायत। अतो महाभागानामेषां समेषामेषां महानुपकारो ऽप्यविस्मरणीय एव स्थास्यति सदैव मम ।

उदयपुर संस्कृतकालेजाध्यक्षाश्रीखड्गनाथमिश्राणां कांकरोलीविद्याविभागाध्यक्षाश्री कण्ठमणिशास्त्रिणां चोपकारो ऽपि ममस्मरणीय एव,यै: पुस्तकावलोकन प्रदानादिना मम साहाय्यमाचरितम् ।

समीक्षाया मस्यांदिवं भुवं वा ऽलंकुर्वताम् येषां महानुभावानां मुद्रिता नाममुद्रितानां वाग्रन्थानाम-शानभिप्रायान् वा गृहीतवानस्मि, समेषामपि-सुकृतिनां तेषां महान्तमुपकारभारं सादरेण हृदयेन बिभर्मि ।

अस्तु । विंशतिवर्षमिते सुदीर्घे समये ऽध्यापयतो ऽनुशीलयतश्च ममजाता ऽनुभूति:प्रस्तुतग्रन्थरूपेण निबद्धोपस्थितास्ति विदुषां सम्मुखे। ग्रन्थे ऽस्मिन् विषयाणां समीक्षणे विवेचने प्रतिपादने च कियती सफलताजातास्ति मम,इत्यत्र निर्णयस्या ऽधिकारी विमलशेमुषीजुषां विदुषामेव,अत एतस्य याथातथ्य-प्रकाशने त एव सन्ति परमं प्रमाणम्, नात्र किमपि वक्तव्यं ममोचितम्। आम् , भारतसर्वकारस्य नियमानुसारं प्रस्तुतनिबन्धलेखनकार्यस्य वर्षद्वयएव पूरणीयतायाआवश्यकत्वात् त्वरा ऽऽ वेगसम्भ्रमो यदि नाभविष्यत्, तर्हिमन्ये ऽस्मिन् निबन्धे सौष्ठवसन्निवेशो ऽधिकतयापर्याप्ततयावा कर्तुमपारयिष्येतेत्यलं पल्लवितेनेति निवेदयते -

लक्ष्मीनारायण पुरोहित:
(लक्ष्मीनारायण पुरोहित:)

वसन्तपञ्चमी
२०२८ वै०